# अभ्यासप्रश्नपत्रम्-2

# Practice paper2

## कक्षा - द्वादशी (XII)

## संस्कृतम् (केन्द्रिकम्) कोड-322

**समयः - होरात्रयम्** **सम्पूर्णाङ्काः -80**

**सामान्यनिर्देशाः -**

*कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति।
*अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम्,उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

## प्रश्नपत्रस्वरूपम्

**अ-भागः बहुविकल्पात्मकः - 40 अङ्काः**

**आ-भागः वर्णनात्मकः - 40 अङ्काः**

(I)अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) अ-भागः बहुविकल्पात्मकः अस्ति।

(iii) आ- भागः वर्णनात्मकः अस्ति।

(iv) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः

(v) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# अ - भागः

## बहुविकल्पात्मकाः प्रश्नाः

## अनुप्रयुक्तव्याकरणम्

1. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत –(केवलं प्रश्नषट्कम्) 1×6= 6

**1.यान्यनवद्यानि** कर्माणि, तानि सेवितव्यानि।
(क ) यान्य+अनवद्यानि (ख) यानि+अनवद्यानि (ग) यान्यन+वद्यानि

2. **युक्ता आयुक्ता:** ते ब्राह्मणा: अनुसरणीयाः।
(क) युक्ता:+आयुक्ता: (ख) युक्तार:+आयुक्ता: (ग) युक्त:+आयुक्ता:

3.एकशरीरसंक्षिप्ता पृथिवी **रक्षितव्या + इति**।
(क) रक्षितव्याति (ख) रक्षितव्योति (ग) रक्षितव्येति

4. अहम् **आसुरीष्वेव** योनिषु क्षिपामि।
(क) आसुरीषु+एव (ख) आसुरी+ष्वेव (ग) आसुरीषु+वेव

**5.आथर्वणश्च** तुरीयः।
(क) आथर्वण+श्च (ख) आथर्वण:+च (ग) आथर्+वणश्च

**6.तदा + अहं** तु जीवन्नपि मृतः भविष्यामि।
(क) तदाहम् (ख) तदहम् (ग) तदाअहम्

**7.सेतुर्येन** महोदधौ विरचित:।
(क) सेतुर्+येन (ख) सेतु:+येन (ग) सेतु+येन

**2. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नपञ्चकम्) 1×5= 5**

i. अस्मान् संन्यासिनः अपि कथं **कठोरै :भाषणै:** तिरस्करोषि (क ) कठोरभाषणै:
(ख) कठोरैभाषणै:
(ग) कठोरभाषण

**ii. राजाज्ञा** पालनीया एव इति।
(क) राजाया: आज्ञा
(ख) राज्ञ: आज्ञा
(ग) राजस्य आज्ञा

**iii. युधि स्थिर:** स्वपत्नीं हारितवान् ।
(क) युध्स्थिर: (ख) युधस्थिर: (ग) युधिष्ठिर:

iv. अहं ब्रह्मविद्यां **सरसां** विधाय शिशुभ्यः शिक्षणं प्रदास्यामि।
(क) रससहिताम्
(ख) रसेन सहिताम्

(ग) सर साम्
v. तान् **<u>नरेषु अधमान्</u>** आसुरीषु योनिषु क्षिपामि।
(क)नराधमान्
(ख)नरधमान्
(ग) नरेषुधमान्
vi. परमात्मा **<u>अनश्नन्</u>** एव अभिचाकशीति।
(क) अन् अश्नन्
(ख) अन् श्नन्
(ग) न अश्नन्
**<u>vii. आयुर्वेद:</u>** उपवेदः विद्यते।
(क) आयो: वेद:
(ख) आयुष: वेद:
(ग) आयुषा वेद:

**3. वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्) 1×6 =6**

i. ........................(**<u>श्लाघ् + अनीयर्</u>**) काले अत्रभवतीं वारयितुं नोत्सहे।

(क) श्लाघनीयर्

(ख) श्लाघनीये

(ग) श्लानीये

ii. लक्ष्मणस्य एषा भृकुटि: नियति इव ................... . । (**<u>वि + अव + स्था + क्त</u>**)
(क) व्यवस्थिता
(ख) व्यवस्थात
(ग) विअवस्थित:
iii. ......................(**<u>शुद्धि+ मतुप</u>**) तदन्वये दिलीप: प्रसूत:।
(क) शुद्धिमत्
(ख)शुद्धिमतुप्
(ग) शुद्धिमति
iv. दौवारिक: तु तम् ................ **<u>नयन्</u>** एव प्राचलत्।
(क)नय् +अन्
(ख) नी अत्
(ग) नी शतृ
v. परं..................... (**<u>संन्यास + इनि</u>**) पण्डिता: बालाश्च न किमपि प्रष्टव्या:।
(क) संन्यासिनि
(ख) संन्यासिनी
(ग) संन्यासिनः
vi. कर्माणि......................... (**<u>आ + रभ् + शानच्</u>**) पुरुषं श्री: निषेवते।
(क) आरभमाणम्
(ख) आरभशानच्
(ग) आरभाणम्
vii. मया कतिपय बिन्दवः एव **<u>प्राप्ता</u>**: ....................... |
(क) प्र + आप् + क्त
(ख) प्राप्+ ता:
(ग) प्राप्त+ क्त

**4. समुचितम् उपपदविभक्तिरूपं चिनुत- (केवलं प्रश्नत्रयम्)** **1×3=3**

i. कश्चन कापालिकः.................. समागतः। (सभा)

(क) सभायाम्

(ख) सभाम्

(ग) सभया

ii. अहं शिशुभ्यः................. प्रदास्यामि । (शिक्षण)

(क) शिक्षणम् (ख) शिक्षणस्य (ग) शिक्षणात्

iii. ऋते च तत्स्वरूपस्य .........................वेदार्थानवगतिः। (परिज्ञान)

(क) परिज्ञानं

(ख) परिज्ञानात्

(ग) परिज्ञानस्य

iv. आकारये अहं ..................तुम्बुरुम् ।(कुलगुरु)

(क) कुलगुरुः

(ख) कुलगुरुणा

(ग) कुलगुरुम्

# पठितावबोधनम्

**5. भाषिककार्यम् - निर्देशानुसारम् उत्तराणि चिनुत - (केवलं प्रश्नषट्कम्)** **1×6=6**

i. '**मुञ्जं महाबलम् आलोक्य**' अत्र **विशेषणपदं** किम् ?

(क) महाबलम्

(ख) आलोक्य

(ग) मुञ्जम्

ii. '**कापालिकं दण्डवत प्रणम्य मुञ्जः प्रावोचद्**' अत्र '**नमस्कृत्य**' इत्यर्थे किं पदं प्रयुक्तम् ।

(क) दण्डवत्

(ख) प्रणम्य

(ग) प्रावोचद्

iii. '**यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः**' अत्र "**त्वम्**" इति सर्वनामपदं कस्मै प्रयुक्तम्।

(क) संन्यासिने

(ख) दौवारिकाय

(ग) गौरसिंहाय

**iv. सत्यं कथय कस्त्वम् ?** अत्र '**कथय**' इति क्रियापदस्य कर्तृपदं किम् ?

(क) सत्यम्

(ख) कः

(ग) त्वम्

v. "**आढ्योSभिजनवान् अस्मि**" अत्र '**धनिकः**' इतिपदस्य किं **पर्यायपदम्** प्रयुक्तम् ?

(क) आढ्य:

(ख) अस्मि

(ग) अभिजनवान्

vi. "**शत्रुजितः पुत्रः ऋतध्वजः उपस्थितः**" अत्र **विशेष्यपदं** किम् ?

(क) पुत्रः

(ख) ऋतध्वजः

(ग) उपस्थितः

vii. "**दुष्टः प्रियः अपि तस्य त्याज्य: आसीत्**" अत्र '**सज्जन**:' इतिपदस्य किं विलोमपदं प्रयुक्तम्

(क ) प्रियः

(ख) त्याज्य:

(ग) दुष्टः

**6. अधोलिखितेषु वाक्येषुरेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चिनुत -(केवलं प्रश्नचतुष्टयम्) 1×4= 4**

(i) माता एव प्रथमा आचार्या इत्यस्ति मे **<u>अवधारणा।</u>**
(क) विचार:
(ख) मान्यता
(ग) अनुमति:
ii.अत्र का **<u>विचारणा</u>** ?
(क) विचार:
(ख) मतम्
(ग) सन्देह:
iii. ब्राह्मणं संप्रेष्य **<u>निशीथे</u>** व्यचिन्तयत् ।
(क) संध्यासमये
(ख) रात्रिकाले
(ग) प्रातःकाले
iv. मान्धाता **<u>कृतयुगस्य</u>** अलङ्कारभूत: आसीत् ।
(क) कलियुगस्य

(ख) सत्युगस्य
(ग) द्वापरयुगस्य
**v. ज्ञानोदधिः** तु अनन्तपारः गभीरश्च।
(क) ज्ञानं दधि च
(ख) ज्ञानामृतम्
(ग) ज्ञानसागरः

# संस्कृतसाहित्येतिहासपरिचयः

**7. समुचितरचनायाः कवेः वा अभिधानं चिनुत - (केवलं प्रश्नत्रयम्). 1×3= 3**

i.“**कार्याकार्यव्यवस्थितिः**” अस्य पाठस्य रचयिता क: ?

(क) चाणक्यः (ख) व्यासः

(ग) भर्तृहरिः

ii.“**भर्तृहरिः** " अस्य लेखकस्य रचना का ?

(क) शिशुपालवधम्

(ख) किरातार्जुनीयम्

(ग) शृङ्गारशतकम्

iii.“**राजशेखरस्य**" कालः कः?

(क) नवम-शताब्याः उत्तरार्धम्

(ख) दशम-शताब्दी

(ग) विंशति-शताब्दी

iv. **बल्लालसेन**” अस्य लेखकस्य रचना का ?

(क) भोजप्रबन्ध:

(ख) वृत्तरत्नाकर:

(ग) तर्कसंग्रह:

**8. गद्य-पद्य-नाटकस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नत्रयम्) 1×3=3**

**(i) संस्कृतनाटकेषु** हास्यपात्रम् कथ्यते ?
(क) मित्रम्
(ख) विदूषक:

(ग) नृप:

**(ii) पद्यकाव्यस्य** भेदाः कति सन्ति ?

(क) त्रयः

(ख) षट्

(ग) पञ्च

(iii) संस्कृतनाटकेषु आरम्भे भवति ?

(क) नान्दी

(ख) भरतवाक्यम्

(ग) प्रगल्भम्

**(iv) गद्यं** कवीनां किम् वदन्ति ?

(क) लौहम्

(ख) वारिम्

(ग) निकषम्

**9. गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नचतुष्टयम्) 1×4=4**

**i. गद्य- पद्य-मिश्रितं** काव्यं ................ कथ्यते।

(क) नाटकम्

(ख) चम्पू

(ग) महाकाव्यम्

ii.................. **चम्पूकाव्यस्य** प्रसिद्धम् उदाहरणम् अस्ति।

(क) नलचम्पू

(ख) रघुवंशम्

(ग) अभिज्ञानशाकुन्तलम्

**iii. महाभारतम्** " कस्य कृतिः ?

(क) वाल्मीकिः

(ख) वेदव्यासः

(ग) कालिदासः

**iv. रामायणम्** ...................... अस्ति।

(क) महाकाव्यम्

(ख) खण्डकाव्यम्

(ग) चम्पूकाव्यम्

v. ..........................**गद्यकाव्यं** भवति ।

(क) छन्दोबद्धम्

(ख) पद्ययुक्तम्

(ग) छन्दरहितम्

## आ–भागः

## वर्णनात्मकाः प्रश्नाः अङ्काः-40

## अपठितावबोधनम्

**10. अधोलिखितं अपठितगद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत – 10**

अवगुणाः मनुष्यस्य शत्रवः सन्ति | तेषु क्रोधः नाम अवगुणः प्रधानशत्रुः अस्ति। क्रोधः मनुष्यस्य विवेकं नाशयति । अयं शत्रुः दुर्जयः अस्ति | विरलः एव मनुष्यः यः क्रोधं न करोति। क्रुद्धः जनः सदैव अन्यान् पीडयति, स्वयं च कष्टम् अनुभवति | क्रुद्धः जनः उचितस्य अनुचितस्य च विचारणे समर्थः न भवति। जनाः क्रोधम् आश्रित्य अपराधं कुर्वन्ति पश्चात्तापं च कुर्वन्ति | क्रोधः क्षणिकः भवति। यः क्रोधं वशीकरोति, सः सर्वथा सुखी भवति। समस्तानां पापानां कारणम् अपि क्रोधः एव अस्ति। अतः अस्माभिः क्रोधः सर्वथा परित्यक्तव्यः।

**( अ ) एकपदेन उत्तरत । ( केवलं प्रश्नचतुष्टयम् )** **1/2 x 4 = 2**

( I ) प्रधानशत्रुः कः अस्ति ?

( ii ) मनुष्यस्य शत्रवः के सन्ति?

( iii ) अस्माभिः सर्वथा किं त्यक्तव्यम् ?

(Iv ) किं क्षणिकं भवति ?

(v) क्रोधः किं नाशयति ?

**( ब )पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )** **2 x 2 = 4**

( I ) जनाः क्रोधम् आश्रित्य किं कुर्वन्ति?

( ii ) पापानां कारणं किम् अस्ति ?

( iii ) क्रुद्धः जनः किं कर्तुं समर्थः न भवति?

**( स ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।** **1**

**( द ) यथानिर्देशम् उत्तरत । ( केवलं प्रश्नत्रयम् )** **1 x 3 = 3**

( I ) 'क्रोधः विवेकं नाशयति'-इत्यत्र कर्तृपदं किम् ?

( ii ) 'कुद्धः जनः अस्ति' इत्यत्र विशेषणपदं किम् ?

( iii ) 'दुःखी' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

( iv ) 'त्याज्यः' इत्यर्थे किं पदमत्र प्रयुक्तम् ?

## रचनात्मककार्यम्

**11. भवान् शुभेन्दुः मुम्बईनगरे निवसति। तव मित्रम् श्रवणः परीक्षायाम् उत्तमाङ्कैः उत्तीर्णः । परीक्षायां सफलतायै वर्धापनं दातुं मित्रं प्रति लिखिते अस्मिन् पत्रे उचितपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत।** **½*10=5**

(i) .....................

तिथि……………..

प्रिय मित्र (ii) ………………..

(iii)………………..

अत्र कुशलं तत्रास्तु। अद्यैव दशमक्षायाः (iv)…………………..केन्द्रीय-माध्यमिक-शिक्षा-सङ्घटनेन समुद्धोषितः ।मया इण्टरनेट इति माध्यमेन तव परीक्षापरिणामः (v)......................... ..। अस्यां परीक्षायाम् त्वम् पञ्चनवतिः प्रतिशतम् (vi)........................ प्राप्य समुत्तीर्णः। संस्कृते तु शतम् एव अङ्कान् लब्धवान् असि। योग्यतासूच्याम् अपि तव नाम दृष्ट्वा अहं हार्दिकं मोदम् अनुभवामि। (vii)............. कठोरः परिश्रमः सफल जातः। त्वया न केवलम् (viii)…………… अपि तु स्वकुटुम्बस्य अपि यशः वर्धितम्। प्रशंसनीयोऽसि त्वम्। अहम् एतस्यै उच्चसफलतायै तुभ्यं हार्दिकम् (ix)………….. यच्छामि। भविष्ये तव का योजना इति लिखतु।

मातृ-पितृचरणयोः प्रणामः।

तव अभिन्नहृदयः

(x)…………………

**मञ्जूषा**

**( श्रवण, परीक्षापरिणामः, मुम्बईतः, नमस्ते, अङ्कान् विदितः, आत्मनः, तव, शुभेन्दुः , वर्धापनम् )**

**12. मञ्जूषायाम् प्रदत्तपदानाम् सहायतया कथायाः पूर्तिम् कुरुत - ½*10=5**

**मञ्जूषा**

**( बहिः, समुत्पन्नः, नदीतटम्, भयम्, प्राविशत्, बालरक्षार्थम्,लिप्तम्, अयुध्यत्, प्राक्षिपत्, पश्चात्तापम् )**

एकस्मिन् नगरे कोऽपि ब्राह्मणः वसति स्म। तस्य गृहे पुत्रः (i)...........................। ब्राह्मणेन एकः नकुलः अपि पालितः। एकदा ब्राह्मणी प्रातःकाले स्वपतिम् अवदत्- अहं जलम् आनेतुम् (ii)..................... गच्छामि। त्वं गृहे एव स्थितः पुत्रस्य रक्षां कुरु। इति उक्त्वा सा गृहात् (iii)..................... अगच्छत्। ततः ब्राह्मणः अपि नकुलात् किमपि (iv) ...................नास्ति, इति मत्वा भिक्षार्थम् अगच्छत्। अत्रान्तरे एकः सर्पः बिलात् बहिः आगच्छत्। नकुलः (v) ................... शत्रुणा सर्पेण सह (vi) ………. । तस्मिन् युद्धे सर्पः मृतः यदा सा

ब्राह्मणी गृहं(vii)................। तदा स: नकुल: उत्साहेन तस्याः समीपं गत:। तस्य मुखं रुधिरेण (viii)..................दृष्ट्वा सा अचिन्तयत्-नूनम् अनेन मम बालकस्य वध: कृतः। अतिक्रुद्धा भूत्वा सा जलकुम्भं तस्य उपरि (ix)..........................। पश्चात् भीता यदा सा गृहं प्रविशति तदा मृतं सर्पं सुरक्षितं च पुत्रं दृष्ट्वा (x) ......................अकरोत् ।

## अथवा

**अधोलिखिते वार्तालापे रिक्तस्थानानि पूरयत। 1×5=5**

व्योमः - भवती प्रातः कतिवादने उत्तिष्ठति ?
पुष्टि: -(I) ...............................................।
व्योमः- त्वया कतिवादने विद्यालय: गम्यते ?
पुष्टि: -(ii) ..............................................।
व्योमः - भवती विद्यालयात् कदा आगच्छति।
पुष्टि: -(iii) ..............................................।
व्योमः - द्विवादने भवती किं करोति ?
पुष्टि:-(iv) ...............................................।
व्योमः - भोजनानन्तरं किं करोति भवती ?
पुष्टि:-(v) ...............................................।

**13.'परोपकारः' इति विषयमधिकृत्य एकम् अनुच्छेदं लिखत।**
**(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् स्वीकर्तव्या अन्यथा स्वयं चिंतयित्वा स्वतंत्ररूपेण लेखनीयम् )**

### मञ्जूषा

( परोपकारः , समजसेवा ,प्रकृतिः , नद्यः , सूर्यः , वृक्षाः , दधीचिः , दयानंदः , अन्नम् ,धनं )

## अथवा

**अधोलिखितवाक्यानां संस्कृतभाषया अनुवादं कुरुत । ( केवलं वाक्यपञ्चकम् ) 1×5=5**

1.कल हम अपने मित्र के घर जाएंगे।
Tomorrow we shall go to our friend's house.
2.ईश्वर जो करते हैं , अच्छा ही करते हैं ।

Whatever God does, does well.
3.महाभारत का नायक कौन है ?
Who is hero of Mahabharata.
4.क्या तुम प्रतिदिन खेलते हो ?
Do you play daily.
5.लता कल बाजार गई थी।
Yesterday lata went to market.
6.हम सब चलचित्र का आनंद प्राप्त करेंगे।
We will enjoy the movie.

## पठितावबोधनम्

14. **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।

**(अ ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** ½*2=

(i) वेदम् अनूच्य आचार्यः कम् अनुशास्ति?
(ii) कस्मात् न प्रमदः ?
( iii) किं वद ?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्)** 2*1=2

(i) केभ्य: न प्रमदितव्यम्?
(ii) शिष्यः कीदृशः भवतु ?

**15. अधोलिखितं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत। 3**

**अल्पज्ञ एव पुरुषः प्रलपत्यजस्त्रम्**

**पाण्डित्यसम्भृतमतिस्तु मितप्रभाषी।**

**कांस्यं यथा हि कुरुतेऽतितरां निनादम्**

**तद्वत् सुवर्णमिह नैव करोति नादम् ॥**

**(अ )एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**

**½*=1**

(i)कीदृशः पुरुषः अजस्रं प्रलपति ?
(ii) किं नादं न करोति ?
(iii) किम् अतितरां निनादं कुरुते ?

**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्)** **2*1=2**

(i)मितप्रभाषी कीदृशः जनः भवति ?
(ii) अल्पज्ञः किं करोति ?

**16. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत। 3**

**रामः - अत्र मोहमुपगतस्तत्रभवान्। हन्त! निवेदितमप्रभुत्वम्। मैथिलि**
**मङ्गलार्थेऽनया दत्तान् वर्कलांस्तावदानय।**
**करोम्यन्यैर्नृपैर्थमं नैवाप्तं नोपपादितम् ॥**
**सीता - गृह्णात्वार्यपुत्रः।**

**रामः - मैथिलि! किं व्यवसितम्?**

**सीता - ननु सहधर्मचारिणी खल्वहम्।**
**रामः - मयैकाकिना किल गन्तव्यम्।**
**सीता - अतो नु खल्वनुगच्छामि ।**
**रामः - वने खलु वस्तव्यम्।**
**सीता - तत् खलु मे प्रासादः।**
**रामः - श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।**
**सीता - एनामुद्दिश्य देवतानां प्रणामः क्रियते।**

**(अ ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½*2=1**

(I) राम: सीतां कान् आनेतुं कथयति?
(ii) सहधर्मचारिणी का अस्ति ?
(iii) एकाकिना केन गन्तव्यम्?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्)** **2*1=2**

(i) रामेण कुत्र वस्तव्यम् ?
(ii) सीता किं निमित्तं देवतानां प्रणामं करोति ?

17. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत – ½*4=2

**न दुर्जन: सज्जनतामुपैति शठ: सहस्रैरपि शिक्ष्यमाण:।**
**चिरं निमग्नोऽपि सुधा-समुद्रे न मन्दरो मार्दवमभ्युपैति।।**

भावार्थ – दुर्जन: शठ: (i) ________ सज्जनै: अपि शिक्ष्यमाण: कदाचित् (ii)________ न प्राप्नोति। यथा अमृतस्य समुद्रे चिरकालं यावत् (iii)----------- मन्दर: पर्वत: (iv) ________ न प्राप्नोति। अतः शठस्य अवबोधनं तु सर्वथा व्यर्थमेव।

**मञ्जूषा**

**( सज्जनताम्, कोमलत्वम्, सहस्रैः, निमग्नः)**

**ॢअथवा**

**प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत।**

**(अ ) दोषेषु यत्नः सुमहान् खलानाम् ।**
(i)महतां जनानां दोषेषु यत्नः भवति।
(ii)दुष्टजनानां दोषेषु एवं यत्नः भवति।
(iii)दुष्टकार्येषु प्रयत्नः न करणीयः।

**(आ) कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।**

(i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्नोति

(ii)पुरुषः श्रियं न प्राप्नोति

(iii) कर्मणा पुरुषः लक्ष्मीं न निषेवते।

**18. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत –**

**प्रजानामेव भूत्यर्थं से ताभ्यो बलिमग्रहीत्।**

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।**

**अन्वयः -** सः(i)_______भूत्यर्थम् एव ताभ्यः (ii)______अग्रहीत्। हि (iii)________सहस्रगुणम्________रसम् आदत्ते।

**अथवा**

**प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत—**

**19) 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह मेलनं कुरुत-**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (i)ज्ञाने मौनं क्षमा शक्तौ | (i) विभूषणं मौनमपंडितानाम् |
| (ii)आकारसदृशप्रज्ञः | (ii) त्यागे श्लाघाविपर्ययः |
| (iii)रूपं प्रसिद्धं न बुधास्तदाहुः | (iii) प्रज्ञया सदृशागमः |
| (iv)विशेषतः सर्वविदां समाजे | (iv) विद्यावतां वस्तुतः एव रूपम् |